## १. धारेरुत्तमर्णः १/४/३५

**पदच्छेदः** - धारेः, उत्तमर्णः - सम्प्रदानसंज्ञाविधायकं द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यस्मात् 'सम्प्रदानम्' इति अनुवर्तते।

अन्यस्वामिकं द्रव्यं निश्चितकाले पुनरर्पणधिया गृहीतम् ऋणम् इत्युच्यते। तस्य ऋणस्य ग्रहीता **अधमर्णः** चेत् ऋणदाता तु **उत्तमर्णः** भवति।

**समासः** - **उत्तमर्णः** - उत्तमम् = प्रतिशतभागादिवृद्ध्या अधिकतां प्राप्तम् ऋणं यस्य सः।

**अधमर्णः** - अधमम् = दुःखप्रदम् ऋणं यस्य सः।

**वृत्तिः** - धारयतेः प्रयोगे उत्तमर्णः सम्प्रदानसंज्ञकः भवति।

**सूत्रार्थः** - हेतुमण्यन्तस्य 'धृङ् अवस्थाने' इति धातोः प्रयोगे उत्तमर्णः सम्प्रदानसंज्ञां लभते।

**उदाहरणम्** - भक्ताय धारयति मोक्षं हरिः।

मोक्षः धरते, तं हरिः धारयति। अत्र भक्तस्य उत्तमर्णत्वात् सम्प्रदानत्वम्।

**तोयं वा पत्रं वा यद्वा किञ्चित् समर्पितं भक्त्या। तदृणं मत्वा देवो निःश्रेयसमेव निष्क्रयं मनुते।'** इत्यादिप्रमाणेन- भक्तकृतेन पूजनार्चनादिना तुष्टः

भगवान्, भक्तप्रदत्तं द्रव्यं मोक्षदानेन निष्क्रीणाति। अतः वाक्ये- भक्तः उत्तमर्णः, भगवान् च अधमर्णः। मोक्षस्य अवश्यदेयत्वेन ऋणत्वम्।

**उत्तमर्णः किम् ?** देवदत्ताय शतं धारयति ग्रामे।

उत्तमर्णपदाभावे ग्रामस्यापि सम्प्रदानसंज्ञां प्राप्येत धारयतेः प्रयोगात्।

## २. स्पृहेरीप्सितः १/४/३६

**पदच्छेदः** - स्पृहेः, ईप्सितः - सम्प्रदानसंज्ञाविधायकं द्विपदमिदं सूत्रम्।

**अनुवृत्तिः** - 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यस्मात् 'सम्प्रदानम्' इति अनुवर्तते।

**वृत्तिः** - स्पृहयतेः प्रयोगे ईप्सितः सम्प्रदानं स्यात्।

**सूत्रार्थः** - **'स्पृह ईप्सायाम्'** इति चौरादिकधातोः प्रयोगे यद् ईप्सितं भवति, तस्य सम्प्रदानसंज्ञा भवति।

**उदाहरणम्**- मम पुत्रः क्रीडनकेभ्यः स्पृहयति।

श्रीबालकृष्णः नवनीताय स्पृहयति।

**विशेषः** - स्पृह्-योगे ईप्सितस्य एव सम्प्रदानसंज्ञा न तु ईप्सिततमस्य। ईप्सिततमस्य तु कर्मसंज्ञा एव।

अर्थात् - स्पृह्धातुः - 1. इच्छामात्रवाची, 2. फलावच्छिन्नेच्छावाची च।

प्रथमे- सम्प्रदानसंज्ञा, द्वितीये तु कर्मसंज्ञा एव।

### ३. क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः १/४/३७

**पदच्छेदः** – सम्प्रदानसंज्ञाविधायकं चतुष्पदमिदं सूत्रम्।

**अनुवृत्तिः** – 'कर्मणा यमभिप्रैति स सम्प्रदानम्' इत्यस्मात् 'सम्प्रदानम्' इति अनुवर्तते।

**समासः** – क्रुधश्च द्रुहश्च ईर्ष्या च असूया चेति तेषाम् इतरेतरयोगद्वन्द्वः क्रुधद्रुहेर्ष्यासूयाः, ते अर्थाः येषां ते – क्रुधद्रुहेर्ष्यासूयार्थाः, तेषाम्।

**वृत्तिः** – क्रुधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपः, तस्य सम्प्रदानसंज्ञा।

**सूत्रार्थः** – ये ये धातवः क्रोध-द्रोह-ईर्ष्या-असूयार्थेषु सन्ति, तेषां प्रयोगे यं प्रति कोपः भवति, तस्य सम्प्रदानसंज्ञा भवति।

क्रोधः = अमर्षः। द्रोहः = अपकारः। ईर्ष्या = अक्षमा।

असूया = गुणेषु दोषाविष्करणम्। – एते क्रोधादयः सर्वेऽपि कोपप्रभावादेव भवन्ति अतः 'यं प्रति कोपः' इति सर्वत्र घटते। कोप-क्रोधयोरस्ति भेदः। **प्ररूढकोपः एव क्रोधः। न हि अकुपितः क्रुध्यति।**

**उदाहरणम्** – पिता पुत्राय क्रुध्यति।

दुर्जनः सज्जनाय द्रुह्यति।

कार्यालये कर्मकरः सहकर्मिणे ईर्ष्यति।

कांग्रेसदलं भाजपादलाय असूयति।

**'यं प्रति कोपः' इति किम्**- भार्याम् ईर्ष्यति, मा एनाम् अन्योऽद्राक्षीदिति।

### ४. क्रुधद्रुहोरुपसृष्टयोः कर्म १/४/३८

**पदच्छेदः** - क्रुधद्रुहोः, उपसृष्टयोः, कर्म - इति सम्प्रदानसंज्ञाविधायकं त्रिपदमिदं सूत्रम्।

**अनुवृत्तिः** - **कर्मणा यमभिप्रैति स सम्प्रदानम्** इति सूत्रात् **सम्प्रदानम्** इत्यनुवर्तते। **क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः** इति सूत्रात् **यं प्रति कोपः** इति च।

**समासः** - क्रुधश्च द्रुह् च इति क्रुधद्रुहौ, तयोः। उपसृष्टयोः = उपसर्गयुक्तयोः।

**वृत्तिः** - सोपसर्गयोः अनयोः योगे यं प्रति कोपः, तत् कर्मसंज्ञं स्यात्।

**सूत्रार्थः** - उपसर्गयुक्तयोः 'क्रुध क्रोधे, द्रुह जिघांसायाम्' इत्येतयोः धात्वोः योगे यं प्रति कोपः, तस्य कर्मसंज्ञा भवति।

**उदाहरणम्** -

प्रजाः क्रूरं नेतारम् अभिक्रुध्यन्ति, अभिद्रुह्यन्ति च।